**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 9 Issue 4, April- 2019
ISSN(o): 2249-7382 | Impact Factor: 6.939
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

# कालिदासस्य काव्यकलकासौन्दर्यम्

**डा. पि.के . दीपक् राज्**
**सहायकाचार्यः, कालिकट् आदर्शसंस्कृतविद्यापीठम्**

**सारांशः**

संस्कृतसाहित्यवाङ्मयस्य महान् कविः नाटककारश्च भवति महाकविकालिदासः। कविवरेणानेन भारतस्य पौराणिककथानां, भारतीयदर्शनानाञ्च आधारेण बह्वः रचनाः विहिताः। तासु च रचनासु भारतीयजीवनपद्धतेः भारतीयदर्शनानाञ्च मूलतत्त्वं निरूपितं वरीवर्ति। अत एव सः राष्ट्रियकविरिति कथ्यते विद्वद्भिः।

न केवलं भारतवर्षे अप च समस्ते विश्वे विद्यमानेषु श्रेष्ठकविषु सर्वोच्चस्थानं भजते कालिदासः। सम्पूर्णे विश्वे तादृशः कश्चित् कविः नैव विद्यते, यः प्रतिभायां कालिदासस्य तुलनायां समर्थः। तादृशस्य कविकुलगुरोः कालिदासस्य काव्यकलासौन्दर्यमत्र सप्रमाणं निरूप्यते।

**कुञ्चीशब्दाः**

काव्यकला, भाषागतवैशिष्ट्यम्, शब्दालङ्काराः, प्रसादगुणः, काव्यमीमांसा।

आमुखम्

कालिदासकृतयः काः इति स्पष्टनिर्णयः अद्यापि असम्भव एव। तथापि विद्वज्जनमतानुसारं अष्टौ ग्रन्थाः कालिदासस्य नाम्नि प्रथिताः उपलभ्यन्ते। कुमारसम्भवम्, रघुवंशं चेति महाकाव्यद्वयं, मेघदूतमिति खण्डकाव्यम्, ऋतुसंहारं, शृङ्गारतिलकं चेति द्वे स्फुटकाव्ये, अभिज्ञानशाकुन्तलं, मालविकाग्निमित्रं, विक्रमोर्वशीयं चेति त्रीणि नाटकानि च।

कालिदासकृतीनां भाषागतवैशिष्ट्यानि

वैदर्भीरीतिमाश्रित्यैव कालिदासस्य रचना। एवमेव प्रसादगुणपूर्णानां ललितशब्दानां प्रयोगः मुख्यं वैशिष्ट्यं भवति। प्रसादगुणस्य लक्षणं तावत् -

चित्रं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।
स प्रसादः समस्तेषु रसेषु रचनासु च।। (साहित्यदर्पणम् 8-7)

कालिदासस्य भाषा अत्यन्तं मधुरा वर्तते। समासानाम् अल्पप्रयोगेण, पदानां समुचितस्थानविनिवेशेन, शब्दालङ्काराणां नैसर्गिकप्रयोगेण च कालिदासकृतयः नितरां शोभन्ते।

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 9 Issue 4, April- 2019
ISSN(o): 2249-7382 | Impact Factor: 6.939
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

# कालिदासस्य कविताकला

कविकुलगुरोः कालिदासस्य कविताकामिनी विश्वस्य सर्वेषामपि सहृदयानां चित्ताकर्षिणीत्यत्र तदास्वादकाः सहृदया एव प्रमाणम्। कालिदासकृतिषु प्रसादगुणस्य अगाधता, माधुर्यगुणस्य मधुरसन्निवेशश्च द्रष्टुं शक्यते। उपमालङ्कारस्य विशेषप्रयोगः, रमणीयाः अलङ्काराः, छन्दसाम् उचितविनिवेशश्च अस्य कृतिषु सुतरां दृश्यते। भावानुसृतैः सरलसरससुन्दरसुबोधशब्दगुम्फैः सम्पन्नाः अस्य कृतयः सहृदयानां मनांस्यावर्जयन्तीत्यत्र नास्ति संशयलवोऽपि।

कालिदासकृतिषु ध्वनिः

संस्कृतसाहित्यवाङ्मये काव्यसौन्दर्योत्पादकानि अलङ्कार-गुण-ध्वनि-रीत्यादयः विविधाः सम्प्रदायाः प्रवर्तन्ते। किन्तु तेषु सर्वेषु सम्प्रदायेषु प्रधानभूतं ध्वनिसम्प्रदायमेव सहृदयहृदयपदवीमध्यास्ते। यथा रमणीनां रमणीयत्वं न कटककुण्डलादिषु अलङ्कारेषु न वा अवयवेषु प्रत्युत लावण्ये एव। तथैव काव्यस्यापि सौन्दर्यं न वाच्यवाचकशब्दार्थेषु न वा अनुप्रासाद्यलङ्कारेषु न वा रीतिषु प्रत्युत ध्वनावेव। तदुच्यते च सहृदयचक्रवर्तिना ध्वनिसम्प्रदायप्रवर्तकेन आनन्दवर्धनेन। यथा -

मुख्या महाकविगिरामलङ्कृतिभृतामपि।
प्रतीयमानच्छायैषा भूषा लज्जेव योषिताम्।। (ध्वन्यालोकः 3-38) इति।

प्रचुरप्रचरितस्यास्य ध्वनिसिद्धान्तस्य भूयांस्युदाहरणानि कालिदासकृतिषु लक्ष्यन्ते। कालिदासकृतयः प्रायः ध्वनिकाव्ये अन्तर्भवन्ति। काव्यमीमांसकैः ध्वनेः उत्तमकाव्यत्वमपि प्रोक्तम्। अभिधेयार्थलक्ष्यार्थयोः व्यतिरिक्तं सहृदयहृदयसंवेद्यम् अर्थान्तरबोधकं काव्यं ध्वनिकाव्यमित्युच्यते।

व्यञ्जनावृत्तेः प्रयोगः कालिदासेन स्वकृतिषु अतिचारुतया कृतो दृश्यते, येन काव्यं चमत्कृततमं सम्पद्यते। कुमारसम्भवस्य कश्चन सन्दर्भः अस्य उत्तमोदाहरणं भवति। कदाचित् ऋषिः अङ्गिराः हिमालयस्य निकटं गत्वा तत्पुत्र्याः पार्वत्याः भगवता परमेश्वरेण सह विवाहविषये भाषते स्म। तत्सन्दर्भे पार्वत्याः चेष्टानां वर्णनाप्रतिपादकं पद्यं लोकोत्तरचमत्कारकारि इति वक्तुं शक्यते। तत् पद्यं यथा-

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलीकमलपत्राणि गणयामास पार्वती।। (कुमारसम्भवम् 6-84) इति।

पद्येऽस्मिन् कुत्रापि कविना लज्जाशब्दस्य प्रयोगो नैव कृतः। किन्तु लज्जायाः उत्पत्तौ पार्वत्या यदाचरितं तदेव वर्णितम्। तदेव पार्वत्याः हृदयगतं लज्जाभावं सम्यक् व्यनक्ति। तच्च

सहृदयहृदयाह्लादे अत्यन्तं समर्थञ्च भवति।

एवमेव रघुवंशे -

वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धामपि यत्समक्षम्।
मां लोकवादश्रवणादहासीः श्रुतस्य किं तत् सदृशं कुलस्य।। (रघुवंशम् 14-61)

श्लोकेऽस्मिन् "सः" "राजा" चेति पदद्वयं रमणीयं ध्वन्यर्थं व्यनक्ति, येन चात्र अपूर्वा चारुता समुदेति। अत्र रामो, मम पतिः , दशरथनन्दनः इद्यादिपर्यायवाचकबहुत्वेऽपि कानने परित्यक्तया सीतया रामो राजा इति नाम्ना किमर्थं व्यपदिष्टः इति प्रश्नः। अत्र व्यञ्जकसौन्दर्यं किञ्चिदस्त्येव। स रामो य आत्मानं राजानं मन्यते न त्वसौ रामो यो मम परिणेता। स नृपंमन्यः रामो मम सीतायास्तस्य प्रजाभूतायाः वचनादेवं वक्तव्यः , यत् सुरनरगन्धर्वादिसर्वजनसमक्षम् अग्नौ शुद्धामपि मां मिथ्यालोकापवादकारणेन भीरुरिव वञ्चयित्वा शून्येऽरण्ये परित्यक्तवानित्ययं तस्य राज्ञो व्यवहारः किं तस्य प्रसिद्धस्य रघुकुलस्य सदृशः, यस्य रघुकुलस्य सदृशः, यस्य रघुकुलस्य राज्ञा रामेणाहं परित्यक्ता, किमसौ रघुवंशः पतिव्रतायाः अग्निशुद्धायाः परिणीतायाः मम सीतायाः परित्यागात् कालुष्यं नोपयास्यति? रामस्तु राजा भवति। राज्ञा च अपराधिन अपि रक्षा करणीयी। एवं मुहुर्मुहुः राजपदनिष्पीडनेन गोप्यमानतया नासौ रामः प्रणयवान् न वा भर्ता नापि न्यायकर्ता इत्यभिव्यज्यते।

कुमारसम्भवस्य पञ्चमसर्गे

तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता।। (कुमारसम्भवम् 5-1)

इत्यत्र बहूनां पदानां व्यञ्जकता कमनीयत्वमुत्पादयति। अमोघपराक्रमः आखण्डलसुहृत् कामदेवोऽपि भगवतो हरस्य नेत्राग्नौ तृणवद् दग्ध इति तथापदेनात्र ध्वन्यते। समक्षपदेन च सर्वैरेव दैवैः एतद् दृष्टं तथापि कोऽपि मदनं त्रातुं नाशक्नोत् इति च ध्वन्यते।

एकमपि व्यञ्जकं पदं काव्यशोभां पुष्णाति किमुत बहूनां समुदाये। उक्तञ्च सहृदयचक्रवर्तिना आनन्दवर्धनेन-

विच्छित्तिशोभिनैकेन भूषणेनेव कामिनी।
पदद्योत्येन सुकवेर्ध्वनिना भाति भारती।। (ध्वन्यालोकः वृत्तिः 3-1)

एवं कविकुलगुरोः कालिदासस्य काव्यं व्यङ्ग्यार्थस्य बहुधा विस्फुरणात् क्षणे क्षणे नवतामुपैति। सर्वेष्वपि कालिदासकृतिषु ध्वनेः अभिनवं रूपं चकास्तीति द्रष्टुं शक्यते। अत एव साधूच्यते

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 9 Issue 4, April- 2019
ISSN(o): 2249-7382 | Impact Factor: 6.939
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

आनन्दवर्धनेन-

वाल्मीकिकालिदासाद्या ये प्रख्याताः कवीश्वराः।
तदभिप्रायबाह्योऽयं नास्माभिर्दर्शितो नयः।। (ध्वन्यालोकः वृत्तिः 3-19) इति।

कालिदासकृतिषु रससन्निवेशः

यद्यपि कालिदासेन तत्तत्स्थानेषु सर्वेऽपि रसाः सन्निवेशिताः, तथापि शृङ्गाररसप्रयोगे कवेरस्य महत् चातुर्यं दरीदृश्यते। कालिदासस्य सम्भोग-विप्रलम्भशृङ्गारयोः प्रयोगः पाठकानां हृदयं चमत्करोति। कुमारसम्भवे सम्भोगशृङ्गारस्य, मेघदूते विप्रलम्भशृङ्गारस्य च प्राचुर्यं द्रष्टुं शक्यते। सम्भोगशृङ्गारापेक्षया विप्रलम्भशृङ्गारप्रयोगे कवेरस्य पराकाष्ठा संदृश्यते। मेघदूतस्य एकम् उदाहरणं यथा-

त्वामालिङ्ग्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगम नौ कृतान्तः।। (मेघदूतम् उत्तरमेघः - 45)

करुणरसस्यापि स्वाभाविकप्रयोगः कालिदासेन कृतो वर्तते। कुमारसम्भवे चतुर्थसर्गस्य रतिविलापसन्दर्भः अस्य उत्तमदृष्टान्तो भवति। एवमेव रघुवंशस्य अष्टमसर्गस्य अजविलापसन्दर्भोऽपि करुणरसप्रवाहेण सहृदयचित्ताकर्षक एव।

कालिदासस्य अलङ्कारप्रयोगकौशलम्

प्रयोगचातुर्येण कस्यचिदलङ्कारस्य यजमानस्संवृत्तः कालिदासः। तदेवोच्यते उपमा कालिदासस्य इति। अस्मात् पूर्वं वा परं वा न कोऽपि कविः ईदृशीं प्रशंसामवाप। कालिदासेन कृताः एव उपमालङ्कारप्रयोगाः रमणीयतया परस्परं स्पर्धन्ते इत्येतदेव तस्य उपमाप्रयोगकौशलस्य प्रमाणम्। रघुवंशस्य सञ्चारिणी दीपशिखेव रात्रौ (रघुवंशम् 6-67) इत्ययं श्लोकः उपमालङ्कारसौन्दर्यस्य पराकोटिं याति। अनेन च कालिदासः दीपशिखाकालिदासः इत्यपि प्रथितः अभवत्। एवमेव अभिज्ञानशाकुन्तलस्य

गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य।। (अभिज्ञानशाकुन्तलम् 1-33) इत्यत्रापि कविना उपमायाः प्रयोगः सहृदयहृदयरञ्जकतया कृतो दृश्यते। कालिदासेन उपमालङ्कारयोजनासन्दर्भे विविधक्षेत्रेभ्यः उपमाश्च चिताः। विविधपदार्थेभ्यः, विविधक्षेत्रेभ्यः, लोकव्यवहारेभ्यश्च उपमाः सृष्टाः कतिपयानि पौराणिकाख्यानान्यपि कालिदासेन उपमायाः

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 9 Issue 4, April- 2019
ISSN(o): 2249-7382 | Impact Factor: 6.939
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

विषयत्वेन स्वीकृताः दृश्यन्ते। रघुवंशे रघोः दिग्विजयस्य वर्णनं कविना अत्यन्तचारुतया कृतं वर्तते। तत्र

स सेनां महतीं कर्षन् पूर्वसागरगामिनीम्।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः।। (रघुवंशम् 4-32)

इत्यत्र पूर्वसागरं प्रति गामिन्याः रघोः सेनायाः नेतृत्वं कुर्वन् रघुः भगीरथ इव शुशुभे, येन शिवजटातः भ्रष्टा गङ्गा पूर्वसागरं प्रति नीता। अत्र रघुः महासेनानायकत्वेन चित्रितः। अस्मिन् विषये श्री. एस्.एल् भण्डारे महोदयेन स्वीये Imagery of Kalidasa इति ग्रन्थे एवमुच्यते-

" In employing the simile of Bhagiratha Kalidasa has painted his hero as a warrior of stupendous strength and valour and has attained sublimity in his style." ( Imagery of Kalidasa P.6)

**उपसंहारः**

कालिदासकृतीनां समीक्षणेन ज्ञायते यत्, कविना मानवहृदयस्य सूक्ष्मभावानामपि निरीक्षणमकारीति। प्रसिद्धव्याख्याकारेण कालिदासस्य विषये उक्तं यत्, कालिदासवचसां वास्तविकरहस्यं सामान्याः न ज्ञातुं प्रभवन्ति, केवलं त्रय एव जानन्ति इति। प्रथमः ब्रह्मा, द्वीतीया वाग्देवी सरस्वती, तृतीयश्च स्वयं कालिदासः। तदुक्तं तेन -

कासगिरां सारं कालिदाससरस्वती।
चतुर्मुखोऽथवा ब्रह्मा विदुर्नान्ये तु मादृशाः।। इति । एवं कालिदासस्य काव्यकलासौन्दर्यं लोकोत्तरचमत्कारकरणे सक्षममिति निस्संशयं वक्तुं शक्यते।

**परिशीलितग्रन्थसूची**

1.कालिदासः, रघुवंशम्, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, 2001
2. कालिदासः, कुमारसम्भवम्, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, 2000
3. कालिदासः, अभिज्ञानशाकुन्तलम्, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, 1998
4. कालिदासः, मेघदूतम्, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, 2001
5. डा. ब्रह्मानन्द त्रिपाठी, कालिदासग्रन्थावली, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, 2012
6. डा. शिव गोविन्द पाण्डेय, नाग प्रकाशक, दिल्ली
7. Madhusudan Mishra , Metres of kalidasa, , Tara Prakashan, Delhi, 1977.